**दिनाङ्क :- 15.10.2025**

**प्रात: - 06:55**

**मंगोलिय-दशस्य राष्ट्रपतिः**

प्रधानमन्त्रिणा श्रीनरेन्द्र मोदिना द्वयोः देशयोः सहकार्यं गहनं कर्तुं क्रियमाण-प्रयत्नस्य भागरूपेण मंगोलियादेशस्य सीमासुरक्षाबलानाम् नूतनः क्षमतानिर्माणकार्यक्रमः घोषितः। श्री मोदिना ह्यः नवदिल्लीनगरे द्विपक्षीयप्रतिनिधि-मण्डलस्तरस्य वार्तालापं कृत्वा मंगोलियादेशस्य राष्ट्रपतिना खुरेलसुख उखना इत्यनेन सह संयुक्ते पत्रकारसम्मेलने एतत् उक्तम्। प्रधानमन्त्री मोदी उक्तवान्, भारतेन मंगोलिया-नागरिकाणां कृते निःशुल्क-ई-वीजा-प्रदानस्य निर्णयः कृतः। श्रीमोदी अवदत् यत् भारतस्य एक दशमलव सप्त अर्बुद अमेरिकीडॉलरस्य ऋणरेखया निर्मिता तैलशोधनपरियोजना मंगोलियादेशस्य ऊर्जासुरक्षायां नूतनं प्रवर्धनं प्रदास्यति।

**भाजपा-बिहार प्रथम सूची:**

प्रधानमंत्री अथ वरिष्ठ भाजपा नेता श्रीनरेन्द्र मोदी अद्य दलस्य बूथ-स्तरीय-कार्यकर्तृभिः सह अन्तरक्रियाशीलसत्रेण सह बिहारविधान-सभानिर्वाचनार्थं स्वस्य अभियानस्य आरम्भं करोति। मेरा बूथ सबसे मजबूत अभियानस्य अन्तर्गतं श्रीमोदी दलस्य कार्यकर्तृभिः सह संवादं करिष्यति। एनडीए-घटबन्धनस्य घटकदलेषु भाजपा-दलेन बिहार-विधानसभा-निर्वाचनार्थं एकसप्ततिः अभ्यर्थीनां प्रथमा सूची प्रकाशिता अस्ति। एनडीए इत्यस्य अन्यः सहयोगी हिन्दुस्तानी आवाम मोर्चा (सेक्युलर) इत्यनेन अपि राज्यविधानसभा-निर्वाचनार्थं षट् अभ्यर्थीनां सूची प्रकाशिता। अपरत्र विपक्षे सि.पि.आई. एम्.एल्. मुक्तिदलम् , राज्यसभानिर्वाचनार्थं अष्टादश अभ्यर्थीनां सूचीं अप्रकाशयत्। अधुनापि राष्ट्रियजनतादलस्य काङ्ग्रेसपक्षस्य च आसन-सहभाग-विषये कोऽपि प्रगतिः न अभवत्। त्रि-चत्वारिंशदुत्तर-द्विशतम् सदस्यीयस्य बिहारविधानसभा-निर्वाचनस्य कृते आगामिमासस्य षष्ठे, अथ एकादशे दिनाङ्के च द्वयोः चरणयोः निर्वाचनं भविष्यति। मतगणना नवम्बर् चतुर्दशे दिनाङ्के भविष्यति।

**राजस्थान-दुर्घटना**

राजस्थाने, जैसलमेर् समीपे ह्यः एका दुःखद-मार्गदुर्घटना अभवत्। वायुनियन्त्रित-शयन-लोकयाने अग्निना दह्यमाने सति, विंशतिः जनाः मृताः अन्ये च अनेके तीव्रतया व्रणिताः सन्ति। जैसलमेर-जोधपुर-राजमार्गे सायं सार्धत्रिवादनस्य समीपे एषा घटना अभवत्। समाचारानुसारं बसयानस्य अन्तः एव ऊनविंशाः यात्रिकाः दग्धाः अभवन्, उपचारकाले एकः जनः मृतः जातः मृतः। पोखरणस्य विधायकः श्रीप्रतापपुरी माध्यमद्वारा पुष्टिं कृतवान् यत् अस्याम् घटनायां विंशति जनानां प्राणाः गताः, यस्याः कारणं शॉर्ट सर्किट् इति मन्यते। दुर्घटनासमये पञ्चाशत्-तः अधिकाः जनाः याने आसन्। पञ्चदश यात्रिकाः घातिताः सन्ति, येषु बहवः सप्तति-प्रतिशतं यावत् तीव्रदग्धाः अभवन्। घातितानां चिकित्सायै जोधपुरनगरस्य महात्मागान्धी-चिकित्सालये प्रवेशः कृतः अस्ति। मुख्यमन्त्री भजनलाल शर्मा ह्यः सायंकाले दुर्घटनास्थलम् गतवान् अनन्तरं जोधपुर-चिकित्सालये आहतानाम् सन्दर्शनमपि कृतवान्। राष्ट्रपतिः द्रौपदी मुर्मू

सामाजिकमाध्यममञ्चे X इत्यत्र स्वस्य दुःखं प्रकटितवती। सा शोकग्रस्तपरिवारेभ्यः गभीराः शोकसंवेदनाः प्रकटितवती, घातितानां शीघ्रं स्वस्थतायै च प्रार्थनां कृतवती। प्रधानमन्त्री नरेन्द्रमोदी दुःखदघटनायाः विषये अतीव दुःखं प्रकटितवान्, घातितानां शीघ्रं स्वस्थतायाः च कामनाम् अकरोत्। केन्द्रसर्वकारेण मृतानां निकटजनानाम् कृते द्वि-लक्षं, आहतानाम् कृते पञ्चाशत्-सहस्र-रूप्यकाणां अनुग्रहराशि: घोषितः अस्ति।

**राजनाथ-ब्राजील मंत्री बैठक :**

रक्षा मंत्री राजनाथ सिंहः अद्य नवदिल्लीनगरे ब्राजीलस्य उपराष्ट्रपतिना जेराल्डो आल्क्मिन् इत्यनेन सह एकां संगोष्ठीम् करिष्यति। अस्याम् संगोष्ठ्यां, ब्राजीलस्य रक्षामन्त्री जोसे मुसिओ मोंटेरो फिल्हो अपि उपस्थितः भविष्यति। रक्षामन्त्रालयेन एकस्मिन् वक्तव्ये उक्तं यत्, नेतारः द्वयोः देशयोः रक्षाक्षेत्रे बहुपक्षीयसम्बन्धानां समीक्षां करिष्यन्ति।

**उत्तरप्रदेश-उज्ज्वला दीपावली:**

उत्तर प्रदेश मुख्यमंत्री योगी आदित्यनाथः प्रधानमन्त्रि-उज्ज्वला-योजना (पीएम-उज्ज्वाला) इत्यस्य अन्तर्गतं राज्ये महिला-लाभार्थिभ्यः अद्य निःशुल्कं एलपीजी-सिलिण्डर्-द्वयं पुनर्भरणं कारयित्वा प्रदास्यति, अनेन राज्ये एक दशमलव अष्ट-षट् कोटिमहिलानां कृते दीपावली-उत्सवस्य व्यय-लाघवः प्राप्तः। नूतनयोजनायाः अन्तर्गतं प्रतिवर्षं चरणद्वये द्वौ निःशुल्क-एलपीजी-पुनःपूरणौ वितरितौ भविष्यतः।

**अन्ताराष्ट्रिय-महिलाविश्वकपः –**

अन्ताराष्ट्रिय-महिला-एकदिवसीय-विश्वकपक्रिकेट्-क्रीडायां श्रीलङ्का-न्यूजीलैण्ड्-देशयोः मध्ये क्रीडा, वर्षया बाधिता। अनेन कोलम्बोनगरस्य आर.प्रेमदासा-क्रीडाङ्गणे द्वितीयपार्यां एकमपि कन्दुकं विना क्रीडा परित्यक्ता, येन द्वयोः दलयोः एकैकं अंकं सहभागं कर्तुं बाध्यं अभवत्।